# શ્રી સૂક્ત

હિરણ્યવર્ણાં હરિણી સુવર્ણરજતસ્ત્રજામ્ ।
ચંદ્રાં હિરણ્યમયીં લક્ષ્મી મતવેદો મ આવહા ॥૧॥
તાં મ આવહ જાતવેદો લક્ષ્મીમનપગામિનીમ્ ।
યસ્યાં હિરણ્ય વિદેયં ગામશ્વં પુરુષાનહમ્ ॥૨॥
અશ્વપૂર્વાં રથમધ્યાં હસ્તિનાપ્રમોદનીમ્ ।
શ્રિયં દેવીમુપહ્વયે શ્રીર્માં દેવી જૂષતામ્ ॥૩॥
કાંસોસ્મિતાં હિરણ્યપ્રાકારમાર્દાં જ્વલન્તીં તૃપ્તાં તર્પયન્તીમ્ ।
પદ્મે સ્થિતાં પદ્મવર્ણાં તામિહોપહ્વયે શ્રિયમ્ ॥૪॥
ચંદ્રાં પ્રભાસાં યશસા જ્વલન્તીં શ્રિયં લોકે દેવજુષ્ટામુદારામ્ ।
તાં પદ્મીનીમ્ શરણમહં પ્રપદ્યે અલક્ષ્મીર્મે નશ્યતાં ત્વાં વૃણે ॥૫॥
આદિત્યધર્ણે તપસોધિજાતો વનસ્પતિસ્તવવૃક્ષોડથ બિલ્વઃ ।
તસ્ય ફલાનિ તપસા નુદંતુ માયાન્તરાયાશ્વ બાહ્યા અલક્ષ્મી : ॥૬॥
ઉપૈતુ માં દેવસખઃ કીર્તિશ્વ મણિના સહ ।
પ્રાદુ ર્ભૂતો સુરાષ્ટ્રેડસ્મિન્ કીર્તિમૃદ્રિ દદાતુ મે ॥૭॥
ક્ષુત્પિપાસામલાં જ્યેષ્ઠામલક્ષ્મીં નાશયામ્યહમ્ ।
અભૂતિમસમૃદ્રિં ચ સર્વાં નિર્ણુદ મે ગૃહાત્ ॥૮॥
ગંધદ્રારાં દુરાધર્ષાં નિત્યપુષ્ટાં કરીષિણીમ્ ।
ઈશ્વરીં સર્વભૂતાનાં તામિહોપહ્વયે શ્રિયમ્ ॥૯॥
મનસઃ કામમાકૃતિં વાચઃ સત્યમશીમહિ ।
પશૂનાં રૂપમન્યસ્ય મયિ શ્રીઃ શ્રયતાં યશઃ ॥૧૦॥
કર્દમેન પ્રજા ભૂતા મયિ સંભવ કર્દમ ।
શ્રિયં વાસય મે કુ લે (ગૃહે) માતરં પદ્મામાલિનીમ ॥૧૧॥
આપઃ સૃજંતુ સ્નિગધાનિ ચિકૂલીત વસ મે ગૃહો
વાચં દેવી માતરં શ્રિયં વાસય મે કુલે ॥૧૨॥
આદાં પુષ્કરિણીં પષ્ટિં પિંગલાં પદ્મમાલિનીમ્ ।
ચંદ્રાં હિરણ્યમયી લક્ષ્મીં જાતવેદો મ આવહ ॥૧૩॥
આદાં પુષ્કરિંણીં પુષ્ટિ સુવર્ણાહેમમાલિનીમ્ ।

સૂર્યાં હિરણ્યમયીં લક્ષ્મી જાતવેદો મ આવહ ॥૧૪॥
તાં મ આવહ જાતવોદો લક્ષ્મીમનપગામિનીમ્ ।
યસ્તાં હિરંણ્ય પ્રભુતિં પ્રભુતં ગાવોદાસ્યોડશ્વાન્ વિંદેયં પુરુષાનહમ્ ॥૧૫॥
યઃ શુચિઃ પ્રયતો ભૂત્વા જુહુ યાદાજ્યમન્વહમ્ ।
સૂક્તં પંચદંશર્ચં ચ શ્રીકામઃ સતતં જપતે્ ॥૧૬॥
સરસિજનિલયે સરોજહસ્તે ધવલતરાંશુક ગંધમાલ્યશોભે ।
ભગવતિહરિવલ્લભેમનોજ્ઞેત્રિભુવનભૂતિકરિ પ્રસીદ મહ્યમ્ ॥૧૭॥
અશ્વદાયૈ ગોદાયૈ ધનદાયૈ મહાધને ।
ધનં મે જુષતાં દેવિ સર્વ કામાંશ્વ દેહિ મે ॥૧૮॥
પુત્ર પૌત્રધનં હસ્ત્યશ્વાદિગવેરથમ્ ।
પ્રજાનાં ભવસિ માતા આયુષ્મન્તં કરોતુ મે ॥૧૯॥